National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 65-67
© 2025 NJHSR
www.sanskritarticle.com

**Krishnananda B.M.**
Research scholar,
Department of studies in Sanskrit-
University of Mysore,
Manasagangotri, Mysuru

**Correspondence:**
**Krishnananda B.M.**
Research scholar,
Department of studies in Sanskrit-
University of Mysore,
Manasagangotri, Mysuru

# दिक्परिज्ञानप्रकारविमर्शः

**Krishnananda B.M.**

**लेखनसारः (Abstract)**

होरा-प्रश्नग्रन्थेषु दिशां परिज्ञानार्थं नैके अंशाः प्रोक्ताः सन्ति। राशिवशात् ग्रहवशात् बलिष्ठग्रहवशात् तथा च लग्नात् वा दिशम् अवगन्तुं शक्यते इति उक्तमस्ति। अत्र दिगवगमने को वा लाभः? इति प्रश्नः उदियात्। चोरः कस्यां दिशि अस्ति, नष्टवस्तु कस्मिन् भागे वर्तते ? प्रोषितः कुतः आयास्यति? सूतिकागृहं कुत्र विद्यते ? इत्यादिसन्देहनिरसनार्थं दिक्परिज्ञानम् अनिवार्यं स्यात् । तस्मात् दिक्परिज्ञानार्थम् उक्ताः उपायाः विशिष्यन्ते । के ते उपायाः ज्यौतिषशास्त्रप्रणेतृभिः प्रोक्ताः इति अस्मिन् लेखने विमृश्यन्ते।

**कूटशब्दाः (Key words)** - अष्टमङ्गलम्, दिक्, दिगीशः, प्रश्नः, राशिः, ग्रहाः, ज्यौतिषम्, चोरप्रश्नः, नष्टप्रश्नः

## १.पीठिका

ज्योतिः शास्त्रं सकलजनिमतां कष्टनिवारणपुरस्सरं जीवनोज्जीवनाय प्रवृत्तमिति विदितमेव। स्कन्धत्रयात्मकज्यौतिषस्य होरास्कन्धे अपि विविधाः विचाराः चर्चिताः सन्ति । तेषु दिग्विचारः अपि अन्यतमः । होराशास्त्रे विशिष्य प्रश्नविभागे दिशां परिज्ञानम् अत्यवश्यकम् । चोरप्रश्ने चोरः कस्यां दिशि अस्ति इति वक्तुं, नष्टप्रश्ने नष्टं वस्तु कुत्र विद्यते इति ज्ञातुं, एकः जनः गृहस्य कस्मिन् भागे विद्यमानसूतिकागृहे जनिं प्राप्तवान् इति प्रकटयितुं, प्रोषितः कस्याम् आशायां आगच्छन् अस्ति इति कथयितुं, देवप्रश्नेः एकः दैवः देवालयस्य कस्मिन् कोणे आसीत् इति परिज्ञातुं तथैव इतोपि बह्वंशबोधनार्थं शास्त्रोल्लिखितदिग्विचाराः प्रामुख्यं भजन्ते ।

होरा-प्रश्नग्रम्थेषु दिक्परिज्ञानार्थं नैके राशिवशात् च बहवो अंशाः उपनिबद्धाः दृश्यन्ते । यदि तान् विधीन् मनसि निधाय दृवज्ञः फलनिरूपणे प्रवर्तते सः निश्चयेन यशोभाक् भवति । तस्मात् के ते विधयः शास्त्रे निरूपिताः इत्यत्र विविच्यन्ते ।

## २.राशिवशात् दिगवगमनम्

दिक्परिज्ञानार्थं त्रिप्रकारकविधानानि उपलभ्यन्ते । तानि अत्र विव्रीयन्ते ।

### २.१ प्रथमप्रकारः

दिगीशपरिज्ञाने राशिवशात् विधानानि गदितानि सन्ति होराशास्त्रे इति कथितम् । राशिवशात् कथं दिक् ज्ञेया इति कथ्यते ।

**अजवृषमिथुनकुलीराः पञ्चमनवमैः सहैन्द्राद्याः ।**[1]

तथा च बृहज्जातके अपि एवमुक्तम्-

**प्रागाधीशाः क्रियवृषनृयुक्ककर्कटाः सत्रिकोणाः।** [2]

मेष-सिंह-धनुराशयः पूर्वदिक्सूचकाः, वृषभ-कन्या-मकरराशयः दक्षिणराशयः, मउँमिथुन-तुला-कुम्भराशयः पश्चिमराशयः, कर्क-वृश्चिक-मीनराशयः उत्तरराशयः इति निर्णीताः भवन्ति । अनेन दिगिशान् निश्चेतुं दैवज्ञाः पारयन्ति ।

**२.२ द्वितीयप्रकारः**

अनन्तरं अन्यः विधिः अपि विद्यते । सूतिकागृहदिगवगमनसमये कथं दिक् ज्ञातव्या इति बृहज्जातकादिविविधग्रन्थेषु उक्तमस्ति -

**प्राच्यादिगृहे क्रियादयो द्वौ द्वौ कोणगता द्विमूर्तयः।**

**शय्यास्वपिवास्तुवद्वदेत्पादैः षट्त्रिनवांशसंस्थितैः।।**[3]

अस्य श्लोकस्य अर्थः अयमस्ति यत् - मेष-वृषभौ पूर्वभागनिर्देशकौ, मिथूनराशिः आग्नेयराशिः, कर्क-सिंहराशी दक्षिणराशी, कन्या नृऋत्यराशिः, तुला-वृश्चिकौ पश्चिमदिक्सूचकौ, धनुराशिः वायव्यराशिः, मकर-कुम्भौ उत्तरदिक्सूचकौ च इति उक्तमस्ति। अनेन विधानेन अपि दिगधीशाः ज्ञायन्ते । दिक्ज्ञानसमये दैवज्ञैः इदमपि विधानं परिगण्यते ।

**२.३ तृतीयप्रकारः**

पूर्वोक्तश्लोकात् पूर्वे एव बृहज्जातके अन्यः श्लोकः अपि पठितः अस्ति सूतिकागृहं कस्यां दिशि वर्तते इति विवक्षुणा वराहमिहिरेण प्रोक्तम् -

**मेषकुलीरतुलादिघटैः**

**प्रागुत्तरतो गुरुसौम्यगृहेषु।**

**पश्चिमतश्च वृषेण निवासः**

**दक्षिणभागकरौ मृगसिंहौ ।।**[4]

मेष-कर्काटक-तुला-वृश्चिक-कुम्भराशिषु अन्यतमं लग्नं चेत् पूर्वदिशि, धनु-मीन-मिथुन-कन्याराशिचमषु चेत् उत्तरदिशि, वृषभराशिः चेत् पश्चिमदिशि, मकर-सिंहौ चेत् दक्षिणदिशि सूतिकागृहं विद्यते इति ब्रूयात्। इमम् उपायं अन्यप्रश्नेषु अपि उपयोक्तुं शक्यते इति अवगम्यते।

**२.३ राशिवशात् दिक्परिज्ञानप्रकारः**

पूर्वोक्तश्लोकात् पूर्वे एव बृहज्जातके अन्यः श्लोकः अपि पठितः अस्ति सूतिकागृहं कस्यां दिशि वर्तते इति विवक्षुणा वराहमिहिरेण -

**मेषकुलीरतुलादिघटैः**

**प्रागुत्तरतो गुरुसौम्यगृहेषु ।**

**पश्चिमतश्च वृषेण निवासः**

**दक्षिणभागकरौ मृगसिंहौ ।।**[5]

मेष-कर्काटक-तुला-वृश्चिक-कुम्भराशिषु अन्यतमं लग्नं चेत् पूर्वदिशि, धनु-मीन-मिथुन-कन्याराशिषु चेत् उत्तरदिशि, वृषभराशिः चेत् पश्चिमदिशि, मकर-सिंहौ चेत् दक्षिणदिशि सूतिकागृहं विद्यते इति ब्रूयात्। इमम् विधिम् अन्यप्रश्नेषु अपि उपयोक्तुं शक्यते इति अवगम्यते।

**३ ग्रहवशात् दिक्परिज्ञानम्**

**३.१ प्रथमप्राकारः**

ग्रहवशात् अपि दिशां ज्ञानं प्राप्तुं शक्यते। विविधहोराग्रन्थेषु नैके उपायाः प्रकटीकृताः सन्ति । तत्त प्रधानतया अयः विधिः गृह्यते सर्वत्र-

**प्रागाद्या रविशुक्रलोहिततमाः सौरेन्दुवित्सूरयः ।**[6]

तथा च अयमेव श्लोकः बृहज्जातके अपि दृश्यते -

**प्रागाद्या रविशुक्रलॊहिततमस्सौरेन्दुवित्सूरयः**[7]

तन्नाम रवि-शुक्र-कुज-राहु-शनि-चन्द्र-बुध-गुरवः क्रमशः पूर्व-आग्नेय- दक्षिण - नैऋत्य - पश्चिम - वायव्य- उत्तर- ईशान्यदिशः शासन्ति इत्य-भिप्रायः ।

**३.२ द्वितीयप्रकारः**

प्रश्नसारसमुद्रे प्रश्नोपयोगि-जातकोपयोगिदिगीशपरिज्ञानविधयोः भिन्नता दृश्यते । प्रश्नमात्रोपयोगिनो दिगीशान् ग्रहानाह इति कथयन् एवमुच्यते प्रश्नसारसमुद्रकारेण जम्बुनाथेन -

**प्रागाद्या रविभौमेड्यबुधाच्छार्कीन्दुराहवः ।**[8]

अत्र सूर्य-कुज-गुरु-बुध-शुक्र-शनि-चन्द्र- राहवः क्रमश पूर्व-आग्नेय-दक्षिण-नैऋत्य-पश्चिम- वायव्य- उत्तर- ईशान्यदिशां च अधीशाः भवन्ति इत्युक्तम्। अनन्तरं दाशाध्याय्यामेव होराकृष्णीयस्य श्लोकः उदाह्रियते। तद्यथा -

**रविकुजगुरुशशितनयभृगुजसौरेन्दुसैंहिकेयानाम्।**

**प्रादक्षिण्येन दिशः प्राच्याद्याः कल्पिताश्चान्यैः।।**[9]

अत्रापि प्रश्नोपयोगिदिगीशाः सूर्य-कुज-गुरु-बुध-शुक्र-शनि-चन्द्र-राहवः क्रमश पूर्व-आग्नेय-दक्षिण-नैऋत्य-पश्चिम-वायव्य-उत्तर-ईशान्यदिशां च अधीशाः भवन्ति इति ये जम्बुनाथेन उक्ताः ते एव कृष्णीये अपि कथिताः सन्ति ।

**४ उपसंहारः**

इमान् उपायान् दिगवगमनार्थं पूर्वाचार्याः अब्रुवन् । विशेषेण प्रश्नशास्त्रे चोर-नष्टप्रश्नादिषु इमानेव अंशान् कथं उपयुञ्जीरन् इति तत्तद्विभागेषु निर्णयः कृतः अस्ति। ऊहापोहपटुना दैवज्ञेन एते विधयः उपयुज्यन्ते चेत् सः प्रश्नः फलप्रदो भवति इत्यत्र नास्ति संशीतिलेशः ।

**आधारग्रन्थः**

१.बृहज्जातकम्।(दशाध्यायीव्याख्योपेतम्)।वराहमिहिरः। श्रीसनातन-भारतभारतीपाठशाला, मैसूरु।. २०००

२.प्रश्नसारसमुद्रः। जम्बुनाथः। मञ्जरबेट्टु अनन्तपद्मनाभभट्टः। संस्कृत-वर्षस्मृतिग्रन्थमाला। अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम्। राष्ट्रिय-संस्कृतसंस्थानम्।मानितविश्वविद्यालयः।नवदेहली।२०१२

३.जातकफलसारोद्धारः।कब्याडि श्रीनिवासाचार्यज्योतिषी। कब्यावि-बलरामाचार्य। कब्याविमठः

४.होराकृष्णीयम्।कृष्णाचार्य। विद्वान् के.आर् गुरुमूर्तिः। पूर्ण-प्रज्ञसंशोधनमन्दिरम्।बेंङ्गलूरु

**संदर्भः**

1 जातकफलसारोद्धारः १/२९

2 बृहज्जातकम् १/११

3 जातकफलसारोद्धारः ४/२६

4 बृहज्जातकम् ५/२०

5 बृहज्जातकम् ५/२०

6 प्रश्नसारसमुद्रः २/५९१

7 बृहज्जातकम् २/५

8 प्रश्नसारसमुद्रः २/५९०

9 होराकृष्णीयम् १/ ३६